नलोपाख्यानम्

7

बृहदश्व उवाच।

एवं स समयं कृत्वा द्वापरेण कलिः सह।

आजगाम ततस्तत्र यत्र राजा स नैषधः॥ ३-५६-१॥

स नित्यमन्तरप्रेक्षी निषधेष्ववसच्चिरम्।

अथास्य द्वादशे वर्षे ददर्श कलिरन्तरम्॥ ३-५६-२॥

antara *n* – время, пространство, промежуток, случай;

कृत्वा मूत्रमुपस्पृश्य संध्यामास्ते स्म नैषधः।

अकृत्वा पादयोः शौचं तत्रैनं कलिराविशत्॥ ३-५६-३॥

upa√sparś VI P. - касаться, трогать; омывать, полоскать (рот);

स समाविश्य तु नलं समीपं पुष्करस्य ह।

गत्वा पुष्करमाहेदमेहि दीव्य नलेन वै॥ ३-५६-४॥

अक्षद्यूते नलं जेता भवान्हि सहितो मया।

निषधान्प्रतिपद्यस्व जित्वा राजन्नलं नृपम्॥ ३-५६-५॥

एवमुक्तस्तु कलिना पुष्करो नलमभ्ययात्।

कलिश्चैव वृषो भूत्वा गवां पुष्करमभ्ययात्॥ ३-५६-६॥

आसाद्य तु नलं वीरं पुष्करः परवीरहा।

दीव्यावेत्यब्रवीद्भ्राता वृषेणेति मुहुर्मुहुः॥ ३-५६-७॥

न चक्षमे ततो राजा समाह्वानं महामनाः।

वैदर्भ्याः प्रेक्षमाणायाः पणकालममन्यत॥ ३-५६-८॥

paṇa *n* - азартная игра, игра в кости, пари, ставка;

हिरण्यस्य सुवर्णस्य यानयुग्यस्य वाससाम्।

आविष्टः कलिना द्यूते जीयते स्म नलस्तदा॥ ३-५६-९॥

तमक्षमदसंमत्तं सुहृदां न तु कश्चन।

निवारणो ऽभवच्छक्तो दीव्यमानमचेतसम्॥ ३-५६-१०॥

ततः पौरजनः सर्वो मन्त्रिभिः सह भारत।

राजानं द्रष्टुमागच्छन्निवारयितुमातुरम्॥ ३-५६-११॥

ततः सूत उपागम्य दमयन्त्यै न्यवेदयत्।

एष पौरजनः सर्वो द्वारि तिष्ठति कार्यवान्॥ ३-५६-१२॥

निवेद्यतां नैषधाय सर्वाः प्रकृतयः स्थिताः।

अमृष्यमाणा व्यसनं राज्ञो धर्मार्थदर्शिनः॥ ३-५६-१३॥

ततः सा बाष्पकलया वाचा दुःखेन कर्शिता।

उवाच नैषधं भैमी शोकोपहतचेतना॥ ३-५६-१४॥

राजन्पौरजनो द्वारि त्वां दिदृक्षुरवस्थितः।

मन्त्रिभिः सहितः सर्वै राजभक्तिपुरस्कृतः।

तं द्रष्टुमर्हसीत्येवं पुनः पुनरभाषत॥ ३-५६-१५॥

तां तथा रुचिरापाङ्गीं विलपन्तीं सुमध्यमाम्।

आविष्टः कलिना राजा नाभ्यभाषत किंचन॥ ३-५६-१६॥

ततस्ते मन्त्रिणः सर्वे ते चैव पुरवासिनः।

नायमस्तीति दुःखार्ता व्रीडिता जग्मुरालयान्॥ ३-५६-१७॥

तथा तदभवद्द्यूतं पुष्करस्य नलस्य च।

युधिष्ठिर बहून्मासान्पुण्यश्लोकस्त्वजीयत॥ ३-५६-१८॥